# संस्कृत–वाङ्मयः १ ( द्वितीयः )

(रघुवंशमहाकाव्यस्य त्रयोदशसर्गः वीथीनाटकं च)

**( माध्यमिक-शिक्षा-बोर्ड-राजस्थान, अजमेर-द्वारा कनिष्ठ-उपाध्याय-कक्षार्थं स्वीकृतं पाठ्यपुस्तकम् )**

**- व्याख्यानकर्त्तारः -**


**डॉ. जगन्नारायण पाण्डेयः**
राष्ट्रिय-संस्कृत-संस्थानम् (मानित-विश्वविद्यालयः),
जयपुर-परिसरः, त्रिवेणीनगरम्, जयपुरम्।

**सतीशकपूरः**
भूतपूर्व व्याख्याता,
श्री दिगम्बर जैन आचार्य संस्कृत महाविद्यालयः,
साँगानेर-जयपुरम्।

**सूरजमल गौतमः**
एम.ए. (संस्कृतम्) शिक्षा-शास्त्री
सम्भागीय-संस्कृत-शिक्षाधिकारी,
जयपुर-सम्भागः, जयपुरम्।


राजकीय विद्यालयों में निःशुल्क वितरण हेतु


2012

**माध्यमिक शिक्षा बोर्ड, राजस्थान, अजमेर**

# प्राङ्निवेदनम्

**'संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः'** इत्येतद् वचनं संस्कृत-वाणी-महिमानं सुतरां लक्षयति। वस्तुतः संस्कृतस्य महिमा एतावान् विलसति यन्न ह्यसौ कैश्चनाऽपि वचन-विन्यासैः साकल्येन प्रकटयितुं शक्यते। एतदीय-गुण-गौरव-गानं यावदपि विधीयतां खलु तावदेव अल्पीयो विभाति। कियन्मात्रमपि अस्य यशो-महिम-गानं विधाय परिणामतः एतन्मात्रमेवाऽनुभूयते यत्- 'इतोऽपि अवशिष्यते--इतोऽपि अवशिष्येततराम्' इति। एतदेव अनुशीलयद्भिः क्रान्तदृश्वभिरपि महर्षिभिः निष्कर्षरूपेण मुक्तकण्ठम् उद्घोषणेयम् अनुविहिता- **'संस्कृतं नाम दैवी वाग्'** इति।

'देवानाम् इयम्' इति दैवी। संस्कृतं हि देववाणी विद्यते। 'देववाणी' इति संस्कृतस्य परिचायकमात्रं यद्वा संज्ञामात्रं पदं न विद्यते प्रत्युत संस्कृतस्य अन्तःस्वरूप-रहस्यात्मक-राजप्रासादस्य मुख्यद्वारभूतम् अद्वितीयम् अनुपमं च पदं विद्यते। यथा देवानां महिमा अनुभवमात्र-गम्यो भवति तथैव संस्कृतस्य महिमाऽपि अनुभवमात्र-विषयो वर्त्तते। अनुभवमात्रगम्यो विषयश्च वचनैः कियानिव प्रदर्शयितुं शक्यते इत्यत्र संस्कृत-प्रसादम् अधिहृदयम् अधिजगन्वाँसो विद्वाँसः खलु प्रमाणम्।

वेदाः, उपनिषदः, आरण्यकाः ब्राह्मणाश्च ग्रन्थाः, स्मृतयः, पुराणानि, दर्शनानि, रामायणं, महाभारतं, सुमहद् अन्यदपि च वाङ्मयं संस्कृतभाषायामेव समुपनिबद्धं विद्यते। संस्काराणां प्रथमाः दीक्षाः शिक्षाः च संस्कृतस्यैव चरणशरणे स्वकीय-चरितार्थतां परिचेतुम् अवचेतुं च महामङ्गलं संश्रयमधिलभन्ते। देवान् आराधयताम् उपासकानां हृदयेषु यथा सत्त्वोद्रेकात् अगणित-गुण-गण-श्रेण्यः महान् पुण्यलाभः समुद्भवति तथैव देववाणीं संस्कृतम् आराधयन्तः सन्तोऽपि पुण्यवन्तो भवन्तो महाकल्याण-परम्परां चाधिकुर्वन्तः ससुखं सुकृतैः कृतार्थ-जीवनाः जीवनमार्गं समन्तात् समुज्ज्वलयन्ति।

जन्मान्तरीय-पुण्योदय-प्रभावात् संस्कृतम् अधीयानानां भद्र-विद्यार्थिनां पुरस्तात् संस्कृतस्य महिमातिशयं प्रदर्शयितुं वयं तावद् एतावन्मात्रं वक्तुमुत्सहामहे यत् प्रखरसूक्ष्मं वैज्ञानिकं चिन्तनं, कुशाग्रबुद्धिं च युगपद् अधिगन्तुं खलु संस्कृतमेव एकं शरणं विराजते, अतः सोत्साह-श्रद्धं प्रविश्यताम्, अधीयताम्, अवबुध्यताम्, आस्वाद्यताम् आत्मसात्क्रियतां, तदनुगुणं च आचरणं प्रचारणं विधीयतां, निःसन्दिग्धं पदं पुरो निधीयताम्। स्वागतं व्याहरति खलु देववाणी, निपीयतां निपीयताम् इति।

### उद्देश-वाक्

प्रस्तूयमानेऽस्मिन् पाठ्यपुस्तके कनिष्ठ-उपाध्याय-कक्षायै संस्कृतवाङ्मयविषयम् अधिकृत्य काव्यविधात्मकं ज्ञानं विद्यार्थिनोऽधिगमयितुं कविकुलगुरु-महाकवि-कालिदास-विरचितस्य रघुवंश-महाकाव्यस्य त्रयोदशः सर्गो ह्युपलक्षणरूपेण सङ्कलितो वर्त्तते। 'संस्कृत-माध्यमेनैव संस्कृशिक्षणम्' इति सिद्धान्त-सरणेः अनुसरणं विधाय च यथायथं व्याकरणात्मक-पक्ष-प्रकाशन-पुरस्सरं, छन्दोऽलङ्कार-भावसौन्दर्य-प्रदर्शनपूर्वकं च व्याख्यानमपि सन्निवेशितमस्ति। अनेन हि विद्यार्थिनो राष्ट्रभाषां (हिन्दीम्) अनवलम्ब्य अपि यथाशक्ति संस्कृत-काव्याऽवबोधने विवेक-सामर्थ्यम् अधिगमिष्यन्ति इति।

पाठ्यपुस्तकमिदं राजस्थान-माध्यमिक-शिक्षामण्डलस्य नूतनपाठ्यक्रमम् अनुसृत्य संसाधितम् अस्माभिः। अस्मिन्नुपक्रमे माध्यमिक-शिक्षा-मण्डलस्य सर्वानपि निर्देशान् तदन्तर्गतानि उद्देश्यानि च परिपूरयितुं प्रयासोऽनुविहितः। कनिष्ठ-उपाध्याय-कक्षायै संसज्जितेऽस्मिन् काव्यविधात्मक-पाठ्यपुस्तके सुगम्य-बुद्धिविनिवेशा इमे विशेषाः स्वीकृता वर्त्तन्ते-

1. श्रेष्ठमुत्कृष्टं च पाठ्यवस्तु स्यात्।
2. आगमन-निगमन-सम्प्रेषणादि-विधिप्रविधीनां प्रयोगः स्यात्।
3. अर्थे भावे चापि विद्यार्थिनाम् अवबोध-योग्यताम् उद्भावयितुं सरल-सरलं मृदुपदान्वितं च व्याख्यानं स्यात्।

4. विद्यार्थिनां मनसि स्थितं सन्धि-समासादि-जटिलता-भयम् अपसारयितुं, प्रकृति-प्रत्ययादि-बोधं विकासयितुं च विश्लेषणात्मक-पद्धतिः स्यात्।

5. विद्यार्थिनां मनस्सु काव्यसौन्दर्यं सम्प्रेषयितुं यथास्थानं छन्दोऽलङ्कारादि-विषये विशदता स्यात्।

6. काव्यात्मक-भाषाया मर्म-स्थलानि स्प्रष्टुं न केवलम् अर्थमात्रस्यैव प्रत्युत आशयस्य अभिप्रायस्य वाऽपि स्पष्टता स्यात्।

7. शब्दानां लाक्षणिकान् (लक्षणा-जन्यान्) अर्थान् अपि अवबोद्धुं विद्यार्थिनः समर्थाः स्युः।

8. व्याख्यानपद्धतौ एव निर्विशेषं कोषस्यापि पर्याप्त-सम्मिश्रणं स्यात्।

9. व्याख्यान-माध्यमेन एव विद्यार्थिनां भाषादक्षताऽपि सम्पद्येत।

10. अभ्यास-प्रश्नादि-व्यपदेशेन च पाठ्यस्य वस्तुनः पुनरनुशीलनमपि सञ्जायताम् इति।

एभिर्विशेषैर्हि प्रयोजनोद्दिष्टं शिक्षणं तावत् सुखपूर्वकं सम्पत्स्यते, सार्थकांश्च परिणामान् जनयिष्यतीति परिकल्पयामः।

**डॉ. जगन्नारायणपाण्डेयः**

साहित्यविभागाध्यक्षचरः

राष्ट्रिय-संस्कृत-संस्थानम् (मानितविश्वविद्यालयः)

जयपुरपरिसरः, त्रिवेणीनगरम् जयपुरम्।

## भूमिका

**महाकविकालिदासः**:- संस्कृतवाङ्मये 'कालिदासः' इति नामोच्चारण-मात्रेण एव कविकुलगुरुः महायशस्वी महाकविः कालिदासः इति पदानि झटिति बुद्धिमारोहन्ति। वैदर्भीसिद्धः मनोभावानां सूक्ष्मविश्लेषण-प्रसिद्धश्चैष महाकविः ई. पू. प्रथमशताब्द्यां स्वजन्मना धरां धन्यां चकार। अस्य महाकवेः विषये नैकाः दन्तकथाः (किंवदन्त्यः) प्रसिद्धाः विद्यन्ते, याः खलु तदीयं महिमाऽतिशयं पदे पदे प्रकाशयन्ति।

महाकवेरस्य सप्त रचनाः प्रसिद्धाःसन्ति। यथा-

1. रघुवंशम् - महाकाव्यम्। 2. कुमारसम्भवम् -महाकाव्यम्।
3. अभिज्ञानशाकुन्तलम् - नाटकम्। 4. विक्रमोर्वशीयम् - नाटकम्।
5. मालविकाग्निमित्रम् - नाटकम्। 6. ऋतुसंहारम् - गीतिकाव्यम्।
7. मेघदूतम् - खण्डकाव्यम् चेति।

तत्र रघुवंश-महाकाव्यम् एकोनविंशति-सर्ग-गुम्फितं वर्तते। अस्मिन् महाकाव्ये हि रघुवंश्यानां यद्वा सूर्यवंशीयानां राज्ञां वर्णनं विहितं महाकविना। महाराजदिलीपात् अग्निमित्रपर्यन्तानां षड्विंशतेः नृपतीनां जीवनवृत्तान्ता अत्र समुपनिबद्धा विद्यन्ते। भेदबाहुल्येऽपि महाकाव्यस्य अस्य मूल-कथानकम् आदिकवि-वाल्मीकि-विरचिताद् रामायण-महाकाव्याद् उद्गृहीतमस्ति।

### रघुवंश-महाकाव्यस्य त्रयोदशः सर्गः-

लङ्काधिपतेः रावणस्य वधं कृत्वा, सीताम् आदाय च अयोध्यां प्रति प्रस्थानं कुर्वतः श्रीरामस्य पुष्पक-विमान-यात्रायाः विशदं वर्णनं रघुवंश-महाकाव्यस्य त्रयोदशे सर्गे विद्यते। यात्रावर्णन-व्यपदेशेन च महाकविना प्रकृतेः विविध-रूपाणां, तद्दर्शनेन जायमानानाम् अतीत-स्मृतीनां च रमणीयं मार्मिकं च चित्रणम् उपन्यस्तम् अस्ति। एकतः प्रकृतेः विविधरूपेषु समुद्रवर्णनं, मेघवर्णनं, पर्वतवर्णनं, नदीवर्णनं, सरोवरवर्णनं, तपोवनवर्णनं च हठात् हृदयम् आकर्षन्ति, प्रकृतेः महामहिम-व्याप्तं स्वरूपं च अक्ष्णोः पुरस्तात् प्रस्तुवन्ति। अपरतश्च रामस्य अतीतस्मृतीनां मार्मिकवर्णनेन द्रवितं संवेदनास्पदं हृदयं कारुण्य-सागरे निमज्जतीव। तत्रैव च तपोवनादिप्रसङ्गे संयमधनानां तपस्विनां तपःप्रधानम् उदात्तजीवनम् अपि निदर्शनरूपेण उपन्यस्यमानं मनसि कामपि दृढसङ्कल्प-निष्ठां प्रतिष्ठापयति।

आधुनिक-जीवन-प्रणाल्यां च इमे त्रयोऽपि पक्षाः ह्रासम् आप्नुवन्तो विलोक्यन्ते। प्रकृतेः उपेक्षाम् आतन्वानाः मानवाः अद्य तस्याः सन्तुलन-व्यवस्थामपि विस्मृतवन्तस्तिष्ठन्ति। स्वकीये पर्यावरणे च महतो दोषान् आविष्कुर्वन्तः स्वयमेव स्वचरणेषु कुठाराघात-सदृशं कृत्यम् आतन्वन्ति। तत्परिणामश्च दिनाऽनुदिनं क्वचिद् भूकम्परूपेण, क्वचिद् जलप्रलयरूपेण, क्वचिद् अतिवृष्टिरूपेण, क्वचिद् विषाक्त-वायुरूपेण क्वचिच्च नवनव-संक्रमणास्पद-महारोगरूपेण प्रत्यक्षं लक्ष्यते।

एवंविधे भयावह-व्यतिकरे तावत् प्रकृतेः सत्यशिवसौन्दर्यरूपदर्शनं हि मानवानां सहृदयताम् आविर्भावयन् कमपि अभिनवम् आशाकिरणम् उज्जागरयिष्यतीति दृष्टिकोणेन सोऽयं त्रयोदशः सर्गः सुतरामुपादेयताम् अभिव्यनक्ति।

सभ्यपद-वाच्याः अपि मानवाः अद्य सभ्यताव्यपदेशेन कियन्तमिव आतङ्कं परितन्वन्ति-इति स्पष्टमनुभूयते अद्यतनीये सन्दर्भे। क्वचिद् राजपद-लालसा, क्वचित् कूटकपट-पाटवं, क्वचित् च नृशंस-प्रशंसनं, क्वचित् पाशविकमाचरणं क्वचिच्च संवेदनायाः समवेदनायाः च नितरामभावः इति किं किं क्रूरता-ताण्डवमद्यत्वे न विलोकयामहे वयम्?

सम्प्रसरति हि एतादृशे वैषम्यविषे सोऽयं त्रयोदशः सर्गः मनुष्याणां पारस्परिक-सम्बन्ध-मर्म-गौरवम् अभिमुखमुज्ज्वलयतीव। रामस्य करुणा, मर्यादानुबन्धश्च, सीतायाः पातिव्रत्यं, लक्ष्मणस्य सौभ्रात्रिकम् आचरणं, भरतस्य त्यागपरायणता, हनुमतः भक्तिपराकाष्ठा, विभीषणस्य सात्त्विकप्रवृत्तिः, वानराणां च मैत्रीनिर्वाह-धुरन्धरता इत्येते महान्तः आदर्शाः अद्यतनीये स्वार्थमात्र-परायणे मानव- जीवने नितराम् अपेक्षणीयतां भजन्ते। अयमपि दृष्टिकोणः कदाचिद् हृदयसंवेदनानाम् उद्रेकम् संस्रावयन् कल्याण-पुण्यानि वितरेदित्याशास्महे।

इत्थमेव तपोधनानामुदात्तजीवनचरितान्यपि दृढसङ्कल्पसङ्कल्पनं पुरस्कुर्वाणानि अद्यतनमानवानां किमपि श्रेयोनिबन्धनम् अभिवर्धयेयुरिति सम्भावयामहे। 'कान्तासम्मिततयोपदेशयुजे' इति काव्यप्रयोजनं त्वतितरामक्षुण्णं सन्तिष्ठत एवेति।

**सतीशकपूरः**

भूतपूर्व व्याख्याता

श्री दिगम्बर जैन आचार्य-संस्कृत महाविद्यालयः, साँगानेर-जयपुरम्।

# अनुक्रमणिका

## रघुवंश–महाकाव्यम्


| **क्रमाङ्कः** | **विन्दुः** | **पृष्ठ-संख्या** |
|---|---|---|
| 1. | त्रयोदशः सर्गः | 1–93 |


## जागरूको भव


| | | |
|---|---|---|
| 1. | प्रास्ताविकम् | 94 |
| 2. | नाट्य-प्रयोजनम् | 94 |
| 3. | नाटकस्य स्वरूपम् | 95 |
| 4. | नाटकस्य उद्भवो विकासश्च | 96 |
| 5. | वीथी-नाटक-परिचयः | 98 |
| 6. | वीथी-नाटकस्य कथावस्तु-परिचयः | 99 |
| 7. | जागरूको भव! (वीथी-नाटकम्) | 101 |
| 8. | अनुशीलन-विस्तरः | 110 |
| 9. | वीथीनाटकस्य दृश्यानुसारं कथा-सारांशः | 114 |
| 10 | चरित्र-चित्रणम् | 117 |